
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ श्रीवरदमूर्तये नमः ॥ श्रीगुरुमूर्तये नमः ॥ श्रीसरस्वत्यै नमः ॥ तिमिरांबुनिधौ मग्नं
करेरूध्यस्य यो जगत् ॥ पालिपस्पाशु तं प्रीस्यात्तस्मै सर्वात्मने नमः ॥१॥ विहरेऽस्तस्तुपाय्य
तेन मसां धेरसान्ले प्रश्नगेहप्रदीपोयं काशीनाथकृतो बमो ॥२॥ उच्चे नीचादिकं
भावं शत्रुमित्रगृहादिकं ॥ विचार्य सम्यग्ज्ञानेन च प्रश्नं ब्रूयाद्विचक्षणः ॥३॥ सुतप्रश्ने सुतस्वा
मी लग्नस्वामी च संस्थितः ॥ नरराशौ तदा पुत्रः स्त्रीराशौ कन्यका च वेत ॥४॥ जनन्या
नामनक्षत्रं गतमासतिथियुताः ॥ वृंदयुक्तानगैर्भक्ता पुत्रदोर्के कुजो गुरुः ॥५॥ गुर्वि
णीनामशुद्धादि तिथि मिश्रुनि मिश्रुते ॥ रामे भागे सुता ह्यांसुत एके नरेवन खं ॥६॥
लग्नस्य विगतै रंश्रैर्गतमासा निरूपिता ॥ भोग्यांशै भोग्यमासाश्च गर्भस्य कललादिकं ॥७॥ समे लग्ने समांशे च राशिः कन्याकरो भवेत् ॥ विषमे विषमांशे च लग्ने पुत्रप्रदे

प्र.प्र.

मतः ॥८॥ लग्नेशो लग्नसंयुक्तो नराशेः चरवीर्यदा तदा पुत्रो ह्यनिर्देश्यो ह्यन्यथा कन्यको
च्यते ॥९॥ विषमे जीवसूर्यौ चेत्पुत्रजन्म करौ मतौ ॥ समे स्त्रियं त्रयः कुर्युः शुक्रचंद्रधरासुताः
॥१०॥ सुते ५ लाभे ११ शुभे नारी गुर्विणीति निगद्यते ॥ विषमर्क्षगतः सूर्यः शशी जीवश्च पु
त्रदः ॥११॥ शुक्रो वामगतो वापि शुभो वा गर्भमीक्षति ॥ चंद्रो वापि तदा पुत्रो गुर्विण्या जाय
ते ध्रुवं ॥१२॥ शुक्रचंद्रौ सुतस्थाने यदि दृष्टा न पश्यतः ॥ न जायते तदा पुत्रः पुत्रप्रश्ने निगद्य
ते ॥१३॥ कदा स्यात्प्रसवो भूयादिति प्रश्ने समागते ॥ त्रोषांशो: प्रसवो मासाः शुक्रांशैश्च ग
ताः स्मृताः ॥१४॥ लग्नाच्चोपचये स्थाने बली तिष्ठति भार्गवः तावंतः कथितव्याश्च मासा
गर्भस्य निर्गताः ॥१५॥ गर्भस्य जीवनप्रश्ने द्वारेशो ना शुभेक्षितः ॥ केंद्रगो वा शुभैर्युक्तः
शिशुर्जीवति जातकः ॥१६॥ उदये दिनरात्रिश्च लग्नस्वामी दिशायहः जन्मप्रश्ने च वा

लस्य दिवा जन्म विनिर्दिशेत् ॥१७॥ दिनलग्ने भवेल्लग्नं लग्नेंशो दिनराशिषु तदा वाच्यं
दिने जन्म व्यत्यये व्यत्ययं वदेत् ॥१८॥ लग्नस्वामी सुतस्थाने लग्ने च सुतनायकः सुतो
द्भवस्य प्रश्ने च तस्मिन्वर्षे सुतोद्भवः ॥१९॥ चंद्रो वा भार्गवो वापि सुते ५ लाभे च ११ संस्थितः
अपत्यं जायते तस्मिन् वर्षे व्रतजयादिभिः ॥२०॥ लाभा ११ स्थाने पंच ५ मे च चंद्रशुक्रौ व्य
वस्थितौ ॥ परस्परेक्षणात्तस्मिन्वर्षे पत्यं प्रजायते ॥२१॥ पुत्रप्रश्ने च पुत्रेशो लग्नेशो वाष्टा
मे स्थितः ॥ यावन्मात्रे ग्रहैः सार्द्धं तावंतस्तनयस्मृताः ॥२२॥ गुरुचंद्रौ पंचमस्थौ कन्यका
कारकौ स्मृतौ ॥ पश्यतः पंचमस्थानं तौ च पुत्रप्रदौ स्मृतौ ॥२३॥ लाभस्थाने भार्गवेंदू
पुत्रजन्मप्रदायकौ ॥ नीचे वास्तमितौ तौ च नैव पुत्रप्रदौ स्मृतौ ॥२४॥ पुत्रप्रश्ने सूर्य
नाडी वाह्यमाना यदा भवेत् ॥ तदा च जायते पुत्रः सोमनाड्यां च कन्यका ॥२५॥ भौमे

न राहुलग्ना वापि सुक्रः स्यात्पंचमे ध्वरः ॥ राहु भौमांतरस्थो वा पुत्रनाशकरो भवेत् ॥ २६ ॥ अ
स्तंगते पंचमेशे पापाक्रांते चेद्दुर्बले ॥ नापत्यं जायते देवाज्जातो पि म्रियते त्रिशु ॥ २७ ॥ चंद्रे दृष्टे
क्रूरयुक्ते क्रूरदृष्टे च पंचमे ॥ नीचस्थो स्तमितो नाथो नैवापत्यं प्रजायते ॥ २८ ॥ पंचमे ज्ञो यदा
लग्ने पंचमे लग्ननायकः ॥ चंद्रयुक्तस्तदा पुत्रं पृच्छकस्य विनिर्दिशेत् ॥ २९ ॥ चंद्रयुक्तो क्षितो
मंदो बुधः शुक्रेक्षितो यदा ॥ उच्चस्थो सुदितो वापि दिव्यापत्यप्रदायकः ॥ ३० ॥ लग्ने युते शुभे
लाभे कर्मस्थाने यदा गुरुः ॥ तदा पुत्रः पृच्छकस्य कथितव्यः सुनिश्चितं ॥ ३१ ॥ सौम्यग्रहः पंच
मस्थो बलवान् पुत्रकारकः ॥ क्रूरवर्गजितः सो पि पुत्रनाशकरो भवेत् ॥ ३२ ॥ द्विः स्वभावियद्
लग्ने शुभः स्यात्पंचमे बली ॥ अपत्यद्वयमाख्याय स्थिरे चैकं चरे बहु ॥ ३३ ॥ यावत्संख्यापु
यलग्नं तत्र पश्येच्चंद्रदृष्टयः ॥ यावंतः कन्यका वाच्या तावंतः पुरुषः स्मृताः ॥ ३४ ॥ शुभदृष्टया
जीवयंति न त्रयंति क्रूरदृष्टिभिः ॥ सर्वक्षिते येहेगर्भे तुंगांशे चोत्तमस्मृतः ॥ ३५ ॥ एकः पुत्रो

रवौ पुत्रे त्रयः पुत्रांश्च मंगले ॥ बुधः कन्या च तस्यश्च सोमे कन्याद्वयं स्मृतं ॥ ३६ ॥ पुत्रपुत्रा गुरौ
वाच्याः षट् कन्याश्चापि भार्गवे ॥ सप्तकन्या शनौ वाच्या ग्रहदृष्टिं विचारयेत् ॥ ३७ ॥ इति पुत्रप्र
श्नः ॥ अथ स्त्रीप्रश्नः ॥ यदा लग्ने चरो लग्ने जायेशः सप्तमे स्थितः ॥ तदा स्त्रीपुंसयोः प्रीति
पीयूषसदृशी भवेत् ॥ ३८ ॥ यदा जायापतिर्लग्ने जायास्थाने पि लग्नपः ॥ तदान्योन्यहृदयोः प्री
ति ब्रूयादिदमवांकितः ॥ ३९ ॥ जायास्थाने लग्ननाथो जायादेशाकरः पुमान् ॥ लग्ने जाया
धिनाथे च पत्यूरा शाकरी प्रिया ॥ ४० ॥ लग्नजायेशयोर्योगो दृष्टिर्वा सप्तमे गृहे ॥ लग्ने वापि
द्वयोराज्ञाकरं चैवेद्वयं भवेत् ॥ ४१ ॥ उच्चालये सप्तमाच्च पतिरूच्चो गुणैर्भिः ॥ लग्नाद्
च्चे सप्तमे च जायो च्चा पतितः स्मृता ॥ ४२ ॥ चतुःसप्तमे क्रूरे यदि शुक्रश्च हुबलः ॥ न जीवति
लदा भार्या शत्रुः स्यात्सप्तमे स्थितः ॥ ४३ ॥ सप्तपंचचतुर्थे च लग्ने सौम्ये न युज्यते ॥ पारणी
तात दा वापि हि भार्या तस्य जीवितः ॥ ४४ ॥ सप्तमे पापसंयुक्ते चतुर्थे सौम्यसंयुते ॥ परिणीता

प्र॰प्र॰

मृता भार्या धृता भार्या च तिष्ठति ॥ ४५ ॥ बालार्कचंद्रबुधेनारी कुमारी भृगुते बुधाः ॥ गुरोर्मध्यस्
ता रूपाढ्या शुक्रे लावण्यसंयुता ॥ ४६ ॥ तेजोयुक्ता कुजेनोक्ता छिद्रयुक्ता राहुमंदयोः ॥ लग्नस्थसूर्यचं
द्रौ चापि कन्याराशिं च धरासुते ॥ ४७ ॥ क्रूरस्थलास्थिरेराशाव पत्यं निजवल्लभात् ॥ क्रूरग्रहाश्चरेरा
वपत्यं परवल्लभात् ॥ ४८ ॥ मिश्रिताश्च ग्रहाराशौ स्थिरे च यदि संस्थिताः ॥ छिद्रा कलत्रस्यापत्यं
वक्तव्यं मिश्रयोरुपात् ॥ ४९ ॥ चंद्रदृष्टिं विना भौमः शनिश्च यदि पंचमे ॥ विलोकयेन्नराग भौ
वक्तव्यो मिश्रयोरुपात् ॥ ५० ॥ शनिभौमेक्षणे हीने पंचमं शुभवीक्षितं ॥ स्वभर्तुरेवगर्भोयं त
दावाच्योविचक्षणैः ॥ ५१ ॥ पापयुक्तौ च द्रष्टौ योगी योलग्नं प्रपश्यति ॥ चंद्रोवाप्यकसंयुक्तं न त
गर्भः परोद्भवः ॥ ५२ ॥ लग्ने राजायाधिपयोर्यदि दृष्टः परस्परं ॥ पूर्णप्रीतिः स्वदृष्ट्या स्वजा स्त्री
पुंसयोर्भवेत् ॥ ५३ ॥ इति स्त्रीप्रश्नः ॥ अथ स्त्रीजातकं ॥ क्रूरलग्ने समुत्पन्ने स्वामिदृष्टिविवर्जि
ते ॥ क्रूरत्वेन तदा नारी भर्त्तारं कुरुते वशं ॥ ५४ ॥ क्रूरक्षेत्रे शुभौ ह्यौ चेल्लग्ने क्रूरो व्यवस्थितो ॥ जातात

च भवेन्नारी कुलस्य विषकन्यका ॥ ५५ दशमे मंगले नारी निःशुक्रा स्वैरिणी भवेत् ॥ गृहासरस्ये
लग्ने शेश त्रुसुक्ते तु जारतः ॥ ५६ क्रूरयुक्तो यदा भौमो निधने च व्यये भवेत् ॥ लग्ने च सिंहिकापु
त्रो रंडा भवति कन्यका ॥ ५७ ऐते र्युक्तो यदा शुक्रो तदान्यं कुरुते पतिं ॥ नीचे मंदे कुजे राहु स्वे
छाचारा च निर्धना ॥ ५८ सप्तमे च कुजे रंडा पतित्यक्ता दिवाकरे ॥ पापे दृष्टे शनौ चास्ते कन्ये
व जरां व्रजेत् ॥ ५९ विधवा चाष्टमे क्रूरे सुशीला वनिता समे ॥ दुःशीला विषमे लग्ने ब ....क्रूरे प
तिर्नहि ॥ ६० लग्ने क्रूरे पतित्यक्ता सुरूपा स समे शुभे ॥ अन्ये लग्ने दुर्बले च कष्टं दुर्जीयते
पतिः ॥ ६१ चरलग्ने प्रवासी च स्थिरे नित्यं गृहे भवेत् ॥ द्विस्वभावे स्त्रियो लग्ने वा शुभ...
...तिष्ठति ॥ ६२ इति स्त्रीजातकं ॥ अथ रोगप्रश्नः ॥ आद्यं वैद्यं गृहं मध्ये ... दशमं रोगिणं गृह
औषधं च चतुर्थं स्यात्ख षष्ठं रोगगृहं शुभं ॥ ६३ वैद्यादिकं गृहं सौम्यं तदादिस्थानकं शुभं ॥ पा
पखंडयदा चे स्यात्तदादिस्थानकं न सत् ॥ ६४ लग्ने चाचं द्रपार्श्वे वा सर्वे यावंत खेचराः ॥ ध

प्र॰प्र॰

नेष्टये चतावंतो रोगिणः पार्श्वगा नराः ॥ ६५ ॥ पुरुषश्चेद्ग्रहतो वाच्या वा च्यास्त्री ग्रहतः स्त्रियः
नपुंसकग्रहे रोगी निकटे च नपुंसकः ॥ ६६ ॥ चरे नास्ति गृहे रोगी चरस्थाने चरे ध्रुवं ॥ आसी
नश्च स्थिरे लग्ने संस्थस्तस्य द्विदेहके ॥ ६७ ॥ स्वे स्वस्थाने स्थितो गेहे द्विस्वभावे पुराद्बहिः ॥ चरे दे
शांतरे रोगी चरस्थाने चरे शुभे ॥ ६८ ॥ - - - - - - स्थाने शुभे लग्ने स्व स्थितेः ॥ रोगीप्र
श्ने मृत्युगेहं स समं ग्रहमुच्यते ॥ शुभे तत्र शुभं वाच्यमशुभे प्यशुभं वदेत् ॥ ६९ ॥ अग्निनष्टे गे
हे विनष्टे स्याद्दग्निरक्षो हरो गिणः ॥ क्रूरस्य गेहे विनष्टे चरत्नेमल्यं निगद्यते ॥ ७० ॥ अतीसारो
ष्टमे चंद्रे भार्गवे च निगद्यते ॥ प्रस्लं बलता निश्च शुक्रयुक्ते ष्टमे कुजे ॥ ७१ ॥ रक्तपीडा पित्त
पीडा स्सूर्ये भूमिसुते ष्टमे ॥ क्रूरयुक्ते बुधे तत्र संनिपातो निगद्यते ॥ ७२ ॥ कलत्रे च कुजे सूर्ये
संतापो रोगिणो भवेत् ॥ चानिरन्य ग्रहैर्युक्तो रोगमन्यं च कारयेत् ॥ ७३ ॥ अष्टमे राहुसूर्यौ
च कुष्ठरोगस्य कारको ॥ महत्कुष्टप्रसवे लावष्टमे कुजसंयुते ॥ ७४ ॥ अष्टमस्थो राहु मेरे

५

वातरोगप्रत्ययको पाणिपादादिकं येन कंपते गात्रपीडया ॥ ७५ ॥ किंमोषधमिति प्रश्ने रोगोयं दृश्यते भवेत् लग्ने वैद्यौ रुजास्त स्याहौषधः सुखमुच्यते ॥ ७६ ॥ बली वैद्यो यदौषध्यो दुर्बलो रोगरोगिणौ रोगि एवजीवनं तत्र विपरीते न्यथावदेत् ॥ ७७ ॥ त्रिकोणकेंद्रलग्नानां शुभग्रहपतिर्बली उच्चताच भवेदेषां रोगी जीवति निश्चितं ॥ ७८ ॥ अष्टमे च रविल्लग्ने चंद्रे वा पित्तलाल्पमिति तिः ॥ सन्निपातात् कुजेत्र स्वबुधे च ज्वरतो मृतिः ॥ ७९ ॥ लग्ने चलग्ननाथे चलाभे वापि बलाच्चिते रोगनाशो दीर्घकालं रोगि एवजीवनं वदेत् ॥ ८० ॥ आजीवनी मष्टमे जीवे त्वष्टान्नो मरणं भृग्गे क्षुधया चशनौ राहौ केतौ चविस्मृतो मृतिः ॥ ८१ ॥ केंद्रे मृत्युपतौ मृत्युर्नष्टे लग्नाधिपे तथा षष्ठेष्टमे लग्ननाथे बले चंद्रे रुजः श्चितं ॥ ८२ ॥ केतैरी रोगमध्यस्थः केंद्रे च युद्धचंद्रमाः ॥ हिबुके क्रूर विद्धे च लग्ने दृष्टे मृतिः स्वले ॥ ८३ ॥ चरेष्टमे चलग्ने च स्थभेषु केंद्रकेंद्रके रोगी त्रयी ऽतो रोगी जीवत्येव विवेचतः ॥ ८४ ॥ इति रोगप्रश्नः ॥ अथ रोगीजीवन

५

९

प्र.प्र.

जीवनं मरणं नाशोदिति प्रश्ने च रोगिणां ॥ मृत्युस्थानं विचार्यैवं बलं लग्ने च शुभाशुभं ॥ ८५ ॥ बलवा
नुदितो लग्ने लग्नस्वामी यदा भवेत् ॥ अस्तंगते दुर्बले च मृत्युपे रोगिजीवनं ॥ ८६ ॥ लग्नेशो दुर्बलश्चा
स्ति मृत्युपोप्युदितो बली ॥ षष्ठाष्टमे यदा चंद्रेस्तदा मृत्युर्हि रोगिणः ॥ ८७ ॥ शुभेक्षितो लग्ननाथो
लग्ने चाश्वोदितो भवेत् ॥ दुर्बलो मृत्युनाथश्च समयास्तोपि जीवति ॥ ८८ ॥ लग्ने रविः शशी चा
स्तो सद्यो रोगप्रदो भवेत् ॥ लग्ने च चंद्रे कलचार्के सद्यो मरणमादिशेत् ॥ ८९ ॥ मेषलग्ने रश्चिकं
चो यदा तिष्ठति भूमिजः ॥ चंद्रयुक्ते मंगले च तदा मृत्युः क्षणाद्भवेत् ॥ ९० ॥ लग्नेशोष्टमनाथश्च यदि
स्याद्दष्टमे गृहे ॥ द्रेष्काणे च यदैकस्मिन् मुच्यते रोगसंकटात् ॥ ९१ ॥ लग्नस्वामी यदा लग्ने लग्नवा
समवीक्षिते ॥ तन्मित्रं वा शुभो वापि तदा जीवति रोगवान् ॥ ९२ ॥ चतुर्थे लग्नधीकर्म लाभेक्वाः
सबलो स्थिताः ॥ तदा नश्रीयते रोगी रोगनाशोपि संकटे ॥ ९३ ॥ रोगिणो जीवनप्रश्ने लग्नेशो

॥६॥ युदितो यदि ॥ लग्ने वा सबलः शुक्रो रोगी जीवति निश्चितं ॥ ९४ ॥ नंदा च हस्तत्रिका भौमे भद्रा श्ले-
षा बुधे सिते ॥ धनिष्ठार्के शनौ रिक्ता मघा चैव जया गुरौ ॥ ९५ ॥ शनौ च भरणी पूर्णा योगे त्वयदि
जायते ॥ रोगो सन्निस्तदा मृत्युर्मेता चाणत्या चजीवनं ॥ ९६ ॥ इति रोगः ॥ अथ वैरीगमनप्रश्नः
॥ परचक्रागमनप्रश्ने विचार्यं सम मरस्थलं ॥ स्थिरे चंद्रे चरे लग्ने रिपुरायाति सत्वरं ॥ ९७ ॥ स्थि-
रलग्ने चरे चंद्रे न गच्छति कदाप्यरिः ॥ स्थिरलग्ने स्थिरे चंद्रे शत्रुरायाति सैनिकः ॥ ९८ ॥ द्विस्व-
भावे यदा लग्ने चरराशौ च चंद्रमा ॥ ग्रहेषु लोविहीनश्च शत्रूणां वृनिवर्तकः ॥ ९९ ॥ भवं तिल-
ग्न तूर्ये च मेषसिंहधनुर्वृषाः ॥ अरिमार्गान्निवर्तंते क्रूरदृष्टाः पराजिताः ॥ १०० ॥ चतुर्थे स्थैः शु-
भैः खेटैः शत्रुरायाति सत्वरं ॥ द्युके चंद्रसूर्यौ विदायाति न कदाप्यरिः ॥ १ ॥ धर्मे लाभाष्टमे शास्तु-
स्थिरे नाप्नोति शात्रवः ॥ स्थिरेष्वथे स्थिरे लग्ने दृष्टे शत्रौ गमनागमः ॥ २ ॥ लग्न धर्मेश्च सौम्यशुक्रौ ह-
ष्टौ वाथ परस्परं ॥ तदागमो रिपोर्नैस्यादन्यथा त्वन्यथा वदेत् ॥ ३ ॥ शनि शुक्र बुधाश्चाग्य ॥६॥

प्रश्न

घेकोपि चरोदये तदा रिपोरागमः स्यात् स्थिरे लग्ने च वानागमः ॥ ४ ॥ रात्रौ निच त्रि एष्छायां ल
ग्ने क्रूरे यदा ग्रहः ॥ पथि रात्रौ स्तरामस्य दैवयोगेन जायते ॥ ५ ॥ पुत्रे रात्रौ स्थितः पापो निच
त्रि क्रोरयेद्दरेः ॥ भाजितं रिपापो च हिबुकस्थो निवर्त्तयेत ॥ ६ ॥ इति वैरिपृच्छा ॥ अथ पंथाप्र
श्न ॥ गमनागमनप्रश्ने पथिकस्य विचारयेत ॥ ससमं भवनं तत्र ज्ञेयं शुभमथाशुभं ७
चरे लग्ने चरे चंद्रे द्विदेहे च चरांशके ॥ गमागमौ हि च ज्ञेयौ स्थिरलग्ने च नागमः ॥ ८ ॥ द्वानि
नागुरुणा दृष्टे स्थिरलग्ने स्यो गमागमौ ॥ शुभेक्षिते चरे लग्ने भवतश्च गमागमौ ॥ ९ ॥ अ
र्कोऽर्कि बुध भौवानामेकोपि चरोदये स्थितः ॥ न चवक्रो यदा तेषां तदा वाच्यं गमागमौ १०
द्विस्वभावे यदा लग्ने द्विस्वभावे च चंद्रमाः ॥ गमागमौ चिराद्वाच्यौ चरांशे चा विचारतः
॥ ११ ॥ लग्नेशी षोदये पापा न शुभा दृष्टोदयेन हि ॥ मीन लग्ने राशे वापि ग्रहे वक्रे च निष्फ
ला ॥ १२ ॥ विदेशागमनप्रश्ने चरलग्ने चरांशके ॥ स्थिरे चंद्रे चगी प्रनेति मग्रहेः रंचांशके

प्र ॥ प

७

स्थिते १२ ॥ बली चंद्रो भार्गवो वा जीवो वा यदि तिष्ठति ॥ चतुर्थे च नदा पांथं वदेद्गृहागतं बुधः

१४ यस्मिन् क्षणे समभ्येति भ्रातृस्थानं शुभग्रहः ॥ तस्मिन् क्षणे समायाति पथिकः

स्वगृहं प्रति १५ चरोदये चरांशे च शुभं पंथागमो द्रुतं ॥ नवांशे ग्रहसंख्याभिर्विश्रमः प

थिको च्युते ॥ १६ ॥ लग्नास्तयोश्चतुर्थे च यावंतो ग्रा भवंति हि ॥ दूरमार्गे च विश्रामास्तावं

तः परिकीर्तिताः ॥ १७ ॥ लग्नात्क्रूरो लग्नपाद्वा यावत्संख्यो ग्रहो भवेत् ॥ तावत्संख्ये च मा

र्गस्थाः पांथस्यस्यादुपद्रुवः ॥ १८ ॥ लग्ने च दृष्टे सप्तमे च चंद्रलग्नेश्वरौ स्थितौ ॥ मृत्युनाथ

युतौ मृत्युं कुरुतः पथिकस्य वा ॥ १९ ॥ लग्ने दृष्टोदये क्रूरे दृष्टे सौम्यैरवीक्षिते ॥ त्रिकोणकें

द्रगैर्वापि पापैः पांथो ति दुःखितः ॥ २० ॥ लग्याल्लग्नेश्वराद्वापि यावत्संख्यः शुभग्रहः ॥ ताव

त्संख्या भवेन्मार्गे लाभश्च परमं सुखं ॥ २१ ॥ मृत्यौ सूर्यकुजे वापि मार्गे चोरभयं वदेत् ॥ या

७

प्र॰प्र॰

वंतो निधने खेटास्तवंतः स्तस्कराः स्मृताः ॥२२॥ सौम्यैर्युते क्षितेलाभे धने लग्नेत्वतीयके तस्करो यद्भवानास्ति पथिकस्येति कथ्यते ॥२३॥ सिंहे सूर्योष्टमे भौमो चंद्रक्षत्रानि वीक्षितः ॥ वास्त्रघातं वदे सांथे लग्नेशुभे गुरौ शुभं ॥२४॥ स्थिरे गमागमौ नस्तश्चरलग्ने च तौ स्मृतौ ॥ द्विस्वभावे ल्पकालेन कथितं योगमागमौ ॥२५॥ एको मार्गे चुवि श्राम चरे द्वौ च स्थिरे स्मृतौ ॥ द्विस्वभावे तथा लग्ने गच्छतश्च त्रयस्मृताः ॥२६॥ शुभ यहे शुभे लग्ने शरीरे सुखमादिशेत् ॥ कर्मस्थाने शुभे खेटे कार्यसिद्धिः प्रजायते ॥२७॥ सप्तमे च शुभे यत्र पातित त्र शुभं वदेत् ॥ सुखस्थाने शुभे खेटे कार्यपूर्ण सुखं वदेत् ॥२८॥ एषु स्थानेषु पापेषु पांथस्याशुभमादिशेत् ॥ पापयुते क्षिते मृत्यु चोरभीति सुखस्मृति ॥२९॥ इति गमागमप्रश्नः ॥ अथ रक्षप्रश्नः ॥ रक्षप्रश्ने ए मूर्तस्थाने ग्रहे रक्षा निरोपिता ॥ शुभं शुभे वदे दक्षं मशुभं त्वशुभे वदेत् ॥१२०॥ पुं रक्षा पुंग्रहै र्वाच्या स्त्री रक्षा स्त्रीग्रहैरपि ॥ स्त्रीग्रहे निर्दिशेद्बह्वी क्लीबैः क्लीस्तु पादपाः ॥१२१॥ रवौ किं

८

शुक्रशारवाद्याः सोमेराजादनीमुखाः ॥ मंगले कंटकेर्युक्ताग्रामाबदरिके बुधे ॥१३२॥ गुरोक्षी
रसुतावृक्षा भार्गवे कदलीमुखाः ॥ इक्षुदाप्रमुखाः मंदराहुकेतौ च ताहशाः ॥१३३॥ सबलाव
लिभिः खेटैः रफलादुर्बले गते ॥ क्रूरयुक्ता वीक्षिता श्च वृक्षाः शुष्काश्च खंडिताः ॥१३४॥ इति
वृक्षप्रश्नः ॥ अथ नौकाप्रश्नः ॥ व्यापाराय गता नौका बुडिता लाभसंयुता ॥ कल्याणसंयु
ता चेति प्रश्ने छिद्रे विचारयेत् ॥१३५॥ लग्नं लग्नेपतिः पश्येदष्टमे रोगोऽष्टमं पश्येत् ॥ नबुडे
च्चतदा नौका लाभो भूरितरो भवेत् ॥१३६॥ लग्ने राश्याष्टमे वा श्च कलत्रे यदि तिष्ठति ॥ त
दापोतस्य संप्रश्ने व्यापारं तत्र चादिशेत् ॥१३७॥ लग्ने रोगस्तगतः क्रूरो लग्ने छिद्रे च
तुर्थगे तिष्ठंति यावत्कालं व्यंतदा नौकापतिर्मृतिः ॥१३८॥ छिद्रे रोगेन क्षिते छिद्रं नाल
ग्नेलग्ननायकः ॥ तदासा बुडिता नौका जले वाच्या विपश्चिता ॥१३९॥ लग्ने राश्याष्ट

८

15

प्र॰प्र॰ मे राश्यनीचे धर्मगृहे भवेत्॥ शत्रुगेहेऽथ वा लाभो व्यवहारान्न जायते॥१४०॥ लग्नं लग्नपतिः प
श्येद् दृष्टमं च बृहस्पतिः॥ व्यवहारभवो लाभो व्यवहारान्न जायते॥१४१॥ शुभयुक्ते क्षितः शुक्रो
यदि छिद्रगृहे भवेत्॥ बलवान् पितृमैत्रास्तदा लाभो जलोद्भवः॥१४२॥ अष्टमांशोदयो चं
द्रो लग्ने पि सबलो भवेत्॥ परदेशागते द्रव्ये स्तदा लाभो निगद्यते॥१४३॥ उच्चं चेद् दृष्टमस्थानं
शुभैर्युक्तं च वीक्षितं॥ लग्नेशः सबलो लाभस्तदा नूरितरो भवेत्॥१४४॥ इति नौकाप्रश्नः॥
॥अथ स्त्रीलाभप्रश्नः॥ कन्या वरीतुं गच्छामि लाभः स्याद्वा न वा मम॥ इति प्रश्ने विचार्यं च
लाभस्थाने शुभाशुभं॥१४५॥ लग्ने शौवे बुधे चारते चंद्रे वा स्वगृहे गुरुः॥ कर्मण्यर्के यदा कन्या
तदा दिव्या हि लभ्यते॥१४६॥ कर्कलग्ने क्रूरहीने कंटकं ससमे शशी॥ अवाप्यते धने शुक्रो क
कमललोचना॥१४७॥ लग्ने सूर्यश्च शीलये पूर्णदेहांबरः कुजः स्थाने चतदा कन्यासु

रूपागुणशालिनी ॥१४८॥ शुक्रो बुधश्चाष्टमस्थो न लाभे भानुस्तनो गुरुः ॥ शनिस्तनी
ये संप्राप्तस्तदा कन्या गुणाधिका ॥१४९॥ लग्ने शुक्रे सुखी ताराश्ची बुधे वक्री गुरौ शुभा
सालंकार धरापुत्रे दरिद्रा दुर्भगा शनौ ॥१५०॥ उच्चस्थिते चतुर्थे च जीवदृष्टे सुधाकरे ॥
विद्याधरी समा नारी लभते च तदा ध्रुवं ॥१५१॥ चंद्रो वा लग्ननाथो वा कन्याला भायसप्त
मे सप्तमे सप्तमाधीशः कन्यालाभप्रदो भवेत् ॥१५२॥ शुक्रेंदुभ्यां युते दृष्टे तुला वृषभ
कर्कटे कन्यालाभो भवत्यर्के सप्तमे च बलान्विते ॥१५३॥ केंद्रत्रिकोणगे सौम्ये सप्तमे ते
विलोकिते शुक्रः स्त्रीराशिलग्ने च कन्यालाभो हि जायते ॥१५४॥ लग्ने भवेरो वरश्चिंत्य सं
सप्तमे शुभश्च कन्यका ॥ लग्नाद्दूरस्य लाभः स्यात् कन्यालाभश्च सप्तमात् ॥१५५॥ लग्ने पुष्टे बली
भर्त्ता सप्तमे स्त्री बलांगना ॥ लग्ने च सप्तमे पुष्टे द्वावेव धनपूरितौ ॥१५६॥ धनस्थाने वले

प्र.प्र.

बलेर्युक्ते र्युक्ते पतिवश्यैः धनं वदेत् ॥ सप्तमे च बले : पुष्टपत्नी पत्यो वदेद्धनं ॥ १५७ ॥ धने क्रूरो ध
ने हीनौ सौम्ये च धन प्रजितो ॥ शत्रुक्षेत्रे च बधे वैरो प्रीतो सरव्यश्य दंपती ॥ १५८ ॥ चंद्रदृष्टे क्रौव
र: प्रश्ने सप्तमे वरदायको ॥ कन्याप्रश्ने सप्तमस्थो तौ च कन्याप्रदायको ॥ १५९ ॥ सौम्ययुक्ते क्षि
ते लाभे कन्यालाभो वरस्य च ॥ कन्यायाश्च वरप्रीतिः क्षेत्रस्वामी बली तथा ॥ १६० ॥ इत्थी ला
॥ भप्रश्नः ॥ अथ नष्टप्राप्तिप्रश्नः ॥ नष्टद्रव्यस्य लाभः स्यादिति प्रश्ने विचारयेत् ॥ १६१ ॥ लाभस्थ
स्थले नष्टलाभं विशेषः कोपि लाभतः ॥ १६१ ॥ नीचोदये पूर्णचंद्रः शुभयुक्ते क्षिते शुभे ॥ स्यान्न
ष्टला भोला भे च शुभे युक्ते क्षिते तथा ॥ १६२ ॥ धने सुते सुखे लग्ने षष्ठे वापि शुभग्रहः ॥ नष्टलाभ
करा: क्रूरो विपरीतं करोति हि ॥ १६३ ॥ लग्नस्था न शुभे युक्ते लाभ: स्याद् शुभं न हि ॥ लग्नास्त
नाथ योर्योगं नष्टावाप्ति श्च कष्टतः ॥ १६४ ॥ लग्ने लग्नेशसंयुक्ते नष्टदः सप्तमेश्वरे : ॥ लग्ना

१०

धिपे सप्तमस्थे नष्टलाभो न जायते ॥ ६५ ॥ पूर्णे चंद्रः शुभे युक्तः सुखवित्ते च नष्टदः ॥ सार्के चंद्रे न
लाभोऽस्ति वक्रयुग्रस्ते चरे तथा ॥ ६६ ॥ ददाति तस्करो द्रव्यं लग्ने सप्तमनायकः ॥ चंद्रे च पापसं
युक्ते चौरो द्रव्यं न यच्छति ॥ ६७ ॥ सप्तमेशो शुभैर्युक्तो केंद्रे चार्थस्य लब्धयः ॥ लग्नस्थे सप्तमा
धीशे राजदत्तं धनं वदेत् ॥ ६८ ॥ मेषालि कन्याककींस्तु कर्मस्था शुभवीक्षिताः ॥ नष्टद्रव्यस्य
लब्धिः स्याल्लग्नेपि च शुभेक्षिते ॥ ६९ ॥ चरोष्टमो धने द्रव्यं स्थितं द्रव्यस्य सप्तमे ॥ मेषादीनां द
वारात्रौ त्रयं त्रयं च सुसाहृतं ॥ ७० ॥ जीवो दृष्टमगः सौम्यो नष्टप्रश्नो यदा त्वके ॥ शीघ्रं नष्टस्य
लाभः स्याद्दीप्ते खेचरे विशेषतः ॥ ७१ ॥ इति नष्टप्राप्तिः प्रश्नः ॥ अथ लाभप्रश्नः ॥ धने लग्ने त्रि
कोणे च चंद्रलग्नपाः ॥ अन्योन्यालोकिता युक्ता द्रुतं लाभप्रदा मताः ॥ ७२ ॥ उच्चाः शुभा यदा लग्ने
धने कर्मणि च स्थिताः ॥ तदा लाभं प्रकुर्वंति धर्मस्थे सौम्यवीक्षिताः ॥ ७३ ॥ कर्मसप्तमगे सौ

१०

19

प्र॰प्र॰

न्ये गुरौ लग्नेंबरेरवौ ॥ शुभैर्लाभस्थैस्तुंगे ला भस्तदा पापखेचरग्रहे ॥ ७४ ॥ स्वर्क्षेला भग
ते चंद्रः सौम्य स्वतुंगे धने पि वा ॥ शुभो वा लाभगः खेटो ला भदस्तत्क्षणाद्भवेत् ॥ ७५ ॥ ल
ग्नना थो यदा लग्ने लाभे लाभेश्वरो भवेत् ॥ उदितः सप्तम स्थो वा ले दा लाभकरः स्मृतः ॥
॥ ७६ ॥ चंद्रः शुक्रो गुरौ वापि लाभे लाभे च वीक्षिते ॥ स्वतो वा परतो वापि लाभो भवति निश्चि
तं ॥ ७७ ॥ उच्चे शुक्रे सुते लग्ने वाथ चतुर्थके ॥ उच्चे वान्य ग्रहो लाभो जायते सर्वसंपदं ॥ ७८ ॥
तुंगगेहे मित्रगेहे स्वगेहे तुंगवीक्षिते ॥ उदिते जायते लाभः त्रिचतुर्गेहे स्यकः स्मृतः ॥ ७९ ॥ लग्ना
ज्जयो गोदये लाभश्च रलग्ने शुभैर्युते ॥ लाभे चंद्रे क्षितेके त्रिकोणे च स्थिते ग्रहैः ॥ ८० ॥ य
त्रनान्यो लाभयोगो विद्यते नवमे गृहे ॥ शुभेन लोकितं तत्र लाभश्चिंत्यो निगद्यते ॥ ८१ ॥ द्वा
दशेशापि भावे पुयवयत्रास्ति पुष्टता ॥ तस्य तस्य भवेल्लाभो धनपुत्रादिकस्य च ॥ ८२ ॥ इति

॥११॥

लाभप्रश्नः ॥ अथ चोरप्रश्नः ॥ ॥ मेषलग्ने द्विजश्चोरो राजन्यश्चा वृषे भवेत् ॥ लग्ने च मिथुने
वैश्यः शूद्रः कर्कटके ध्रुवं ॥१८३॥ अंत्यजस्तस्करः सिंहे कन्यायां चवरांगना ॥ पुत्रो भ्राता सुतो
वापि तुलायां तस्करो भवेत् ॥१८४॥ वृश्चिके सेवकश्चोरो चापे भ्राता स्त्रियो थवा ॥ मकरे वैश्य
जनश्चोरो कुंभे चोरस्तु मूषकः ॥१८५॥ तुलालग्नेगतश्चोरो मार्गे मिलति मानवः ॥ अंगे वि
हीनं त्रा वेश्या कुंभे च स्त्रीगोलकः ॥१८६॥ वृश्चिके गछतो मार्गे पुरुषः कपिलोचनः ॥ पील
स्थ धनुलग्ने पुरुषश्चाति सुंदरः ॥१८७॥ लग्ने च मकरे नाना नीचा हस्ता च चेटिका ॥ विध
वा पृष्ठ कस्ये हमार्गे मिलति गछतः ॥१८८॥ स्त्री कापा च हस्ता च ॥ कुंभे स्त्री मिलिता ध्रुवं
मीने पुरुषयुग्मे च प्रष्टो मिलति गछतः ॥१८९॥ इति प्रश्नलग्ने चोरज्ञानं ॥ अथ जन्मपत्रि
काविचारः ॥ ॥ चरलग्ने करे दीपः स्थिरे तत्रैव संस्थितः ॥ द्विस्वभावे तथा लग्ने करे पद्म वि
स्थानांतरमपेक्षते

प्र॰प्र॰

दविचारितः ॥१९०॥ द्रेष्काणे प्रथमे दीपः परिपूर्णो द्वितीयके ॥ अर्द्धपूर्णो हि तैलेन तैलहीनस्तृ
तीयके ॥१९१॥ राशेः प्रथमभागस्थे चंद्रे पूर्णप्रदीपकः ॥ द्वितीयभागे चंद्रे च हीनतैलो निगद्यते
॥१९२॥ चंद्रलग्नांतरस्थैर्हि ग्रहैर्दीपाच्च योषितः ॥ मध्यषड्भे मध्यगास्ता बाह्यषड्भे च बाह्यगाः
॥१९३॥ ग्रहाणां समतायां च तास्त्रियः समलक्षणाः ॥ लग्ने शावर्णरूपा धैर्यवर्तिका रूपमुच्य
ते ॥१९४॥ लग्नेस्य प्रथमे भागे सूर्यप्राच्यां प्रदीपकः ॥ द्वितीये च तृतीये च भवेदीशानकोण
गः ॥१९५॥ चतुर्थे चोत्तरे वायोः कोणे पंचमषष्ठयोः ॥ सप्तमे पश्चिमायां च नैरृत्यां सप्तमे
ष्टमे ॥१९६॥ दशमे नैदक्षिणे स्यादग्निकोणे च दीपकः ॥ द्वादशैकादशे प्राक्को दीपा भाव
परोक्ष्ययं ॥१९७॥ इति जन्मपत्रिका विचारः ॥ अथ पद्प्राप्ति प्रश्नः ॥ पदप्राप्तिर्मम स्याद्वा
नेति प्रश्ने विचारयेत् ॥ लाभस्थानं शुभेतत्र शुभं स्यादशुभे न हि ॥१९८॥ केंद्रत्रिकोणे
स्थिरे शुभे वीक्षिते ॥ उच्चस्थे शुभदृष्टे वापि पदप्राप्तिस्तदोच्यते ॥१९९॥ लग्ने चास्वोच्चना

१२

थेनतुंगस्थेनानिरीक्षितः ॥ पद्मासिकरः प्रोक्तो लग्ने लग्नेश्वरस्तथा ॥ २०० ॥ स्थिरे लग्नेस्वामि
नाच दृष्टे युक्तेथवा शुभेः ॥ राज्यलाभकरः प्रोक्तो दृश्चिकः स्वल्पोभवद्भुत ॥ २०१ ॥ मार्गेत्रो भ्युदिते
केंद्रे लाभे वापि त्रिकोणके ॥ ग्रहाश्चान्यश्च रे लग्ने तदा राज्यं हि लभ्यते ॥ २०२ ॥ लग्ने चोपदना
थो च दृष्टो युक्तो परस्परं ॥ लाभे वा कर्मनाथो वा यो भ्रिचंद्रः पदेप्रद ॥ २०३ ॥ उच्च त्रिकोण केंद्र
स्थे चतुः पंचादिभिर्ग्रहैः ॥ कर्मस्थैर्वा ध्रुवा पुत्रे राज्यप्राप्तिर्निगद्यते ॥ २०४ ॥ तुंगस्थो लग्नगः
रवेदैः चोषामूल त्रिकोणगाः ॥ स्वगृहे संस्थिता वापि राज्यलाभकराः स्मृताः ॥ २०५ ॥ सर्वग्र
हेक्षितः श्चंद्रो लग्नं वा परलाभहल ॥ राज्ययोगेषु सर्वेषु राजयोगो निगद्यते ॥ २०६ ॥ सुनफाद्
त्रये योगे विशेष भवति के त्रिके ॥ भवत्येव परस्मा तिउच्चस्थे च विशेषतः ॥ २०७ ॥ उच्चे गभीधि
यो गर्भे पुमान् सर्वग्रहेक्षितः ॥ भविष्यति सुलो राजा स्त्री गृहे भन्यको च्यते ॥ २०८ ॥ इति रा
ज्यप्राप्तिप्रश्नः ॥ अथ जयपराजयप्रश्नः ॥ जयः पराजयो वास्या दिति प्रश्ने विचारयेत् दृष्ट्वा

१२

23

प्र॰प्र॰

दशमे भवने नवमे ये शुभमथाशुभं ॥ ९ ॥ स्तनलग्नो नमांगानि श्रवर्णे पुरवानि च ॥ नासागंडौ कटिस्कंधौ प्रष्टः प्रश्ने जयं वदेत् ॥ ११० ॥ लग्ने नागो वा थ कर्मेशो भवेद् युक्त ये गृहे ॥ शुभवाले शुभ द्रव्य प्रेक्षणे जयमादिशेत् ॥ १११ ॥ लग्नेशु कार्यिके जीवदाः ज्ञोपाः स्वे दाश्च संस्थिताः ॥ आत्मपुत्र सुहल्लाभे धर्मे वापि तदा जयः ॥ ११२ ॥ लग्ने कुजो थ मंदो वा कर्मण्यर्के सुतेतुरः ॥ धर्मेला भे सुत स्थौ च तदा प्रष्टुर्जयं वदेत् ॥ ११३ ॥ गुरुर्लग्ने रिपो मंदे दशमे च यदा शशी तदा जयो नृपस्यो क्तो लाभे च भृगुनंदने ॥ ११४ ॥ होरायाः अष्टमे पापे सप्तमे हिबुके पि वा ॥ न शुभं प्रष्टुराख्यातं दशमे च शुभे शुभं ॥ ११५ ॥ युद्धे भंगो यमा कीर्ते नवमात्मज लग्नगैः ॥ शशांके सप्तमे लग्ने भृगुसूनू पुत्र वीक्षिते ॥ ११६ ॥ स भौमे निधने मंदे भृगुलग्ने दिवाकरे ॥ लग्नेकलत्रे मृत्यौ च स सूर्ये च वदेद् ध्रुवं ॥ ११७ ॥ लग्नस्थौ चंद्र भूपुत्रौ षष्ठस्थौ बुध भार्गवौ ॥ निध

१३

स्थे दिवाथे नवांसज्ञी वृषं वदेत् ॥ ११८ ॥ ननयुस्यवधः प्रष्टुः पापे रूद्रयपुत्रगेः ॥ निधनेच
निशानाथे लग्ने सूर्यात्मजे क्षिते ॥ ११९ ॥ ससमे निधने चंद्रे लग्नस्थे च दिवाकरे ॥ विपर्ययेवा
प्रष्टुश्च भवेद्बंधवधोगमः ॥ १२० ॥ द्वित्रिकेंद्रस्थितेः पापैः सौम्यैश्च बलवर्जितैः ॥ अष्ट
मस्थे प्रष्टुर्बंधो वधोथवा ॥ १२१ ॥ अर्को ॥ कसंयुते लग्ने दृष्टे वा क्षितिसूनुना ॥ चंद्रस्थे विबले
सौम्ये प्रष्टुः सेनापतेर्वधः ॥ १२२ ॥ इति जयपराजयप्रश्नः ॥ इति श्रीनीलनाथकृत प्रश्न
प्रदीपः समाप्तः ॥ संवत् १८६१ शाके १७२६ वर्षे रक्ताक्षी नाम संवत्सरे अधिक चैत्र
६ ॥ १३ भानुवासरे अवधा... वार रूपनामक श्रीमद्रुमदेवशत्मज श्री नरसिंहदेव
स्वसुतेना हरीवर्मा रेन श्रीप्रश्नप्रदीपस्य पुस्तकं समाप्तमगमत् स्वपठनार्थं परोप
कारार्थं च ॥ श्रीलक्ष्मीनृसिंहो जयतितितराम् ॥ ७ ॥ ७ ॥ ७ ॥ छ ॥ छ ॥ श्रीरस्तु

[OrderDescription]
,CREATED=25.06.20 15:10
,TRANSFERRED=2020/06/25 at 15:16:27
,PAGES=25
,TYPE=STD
,NAME=S0003229
,Book Name=M-1506-PRASHANPRADEEP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,